संस्कृतवार्ताः

07.11.2024

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· विदेशमन्त्रालयेन अद्य उक्तं यत् भारत-अमेरिकादेशयोः मध्ये सहभगिता बहुपक्षीया विशिष्टा च अस्ति।

· केन्द्रीयगृहमन्त्री अमितशाहः अद्य घोषितवान् यत् आतङ्कवादस्य आतङ्कवादिनः च पारिस्थितिकीतन्त्रस्य विरुद्धं सर्वकारः शीघ्रमेव राष्ट्रिय आतङ्कवादविरोधी नीतिं रणनीतिं च आनयिष्यति।

· सर्वोच्चन्यायालयेन अद्य निर्णयः कृतः यत् सर्वकारीयकार्येषु नियुक्तिनियमाः तावत् पर्यन्तं न परिवर्तितुं शक्यते, यावत् पर्यन्तं निर्धारितं न भवति।

· प्रधानमन्त्रिणा-नरेन्द्र-मोदिना अद्य छठ-पूजायाः तृतीये दिने छठ-सन्ध्यायाः अर्घ्यम् अभिलक्ष्य राष्ट्रवासिभ्यः शुभकामनाः प्रदत्ताः।

· यात्रिणां सुविधायै भारतीयरेलवे श्वः आरभ्य चतुः षष्ट्यधिकैकशतानि विशिष्ट रेलयानानि चालयिष्यति।

· बैडमिण्टन-क्रीडायां भारतस्य किरणजॉर्जः इत्येषः इक्सान्-नगरे आयोक्ष्यमाणे कोरिया-मास्टर्स्-प्रतियोगितायाः प्रागुपान्त्यचक्रीयद्वन्द्वे प्रविष्टवान्।

<u>विदेशमंत्रालयः</u>

विदेशमन्त्रालयेन अद्य उक्तं यत् भारत अमेरिकादेशयोः मध्ये सहभगिता बहुपक्षीयः विशिष्टश्चास्ति। अद्य नवदिल्ल्यां वार्ताहरान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जयसवालः अवदत् यत्, प्रधानमन्त्री नरेन्द्रमोदी निर्वाचितराष्ट्रपतिना डोनाल्ड ट्रम्पेन सह वार्तां कृतवान्, अपिच तस्मै उक्तवान् यत् भारतं भारत-अमेरिका-व्यापकवैश्विकं सामरिकं च सहभगितां इतोप्यधिकं सुदृढं कर्तुं उत्सुकः अस्ति। श्रीजयसवालः अवदत् यत्, भारतं अमेरिका च जनानां

हिताय शान्तिसुरक्षां च सुनिश्चित्य कार्यं करिष्यति। कनाडादेशस्य टोरोन्टोनगरे केषाञ्चन निर्धारितवाणिज्यदूतावासशिबिराणां पिधान प्रकरणे श्रीजयसवालः अवदत् यत् एतानि शिबिराणि कनाडासर्वकारेण पर्याप्तं सुरक्षां संरक्षा आश्वासनं वा न प्राप्तं अतएव एतेषां शिविराणां पिधानं जातम्।

<u>सर्वोच्चन्यायालयः - नियुक्तिनियमाः :</u>

सर्वोच्चन्यायालयेन अद्य निर्णयः कृतः यत् सर्वकारीयकार्येषु नियुक्तिनियमाः तावत् पर्यन्तं न परिवर्तितुं शक्यते, यावत् पर्यन्तं निर्धारितं न भवति। मुख्यन्यायाधीशः डी.वाई.चन्द्रचूडस्य नेतृत्वे पञ्चन्यायाधीशपीठस्य मतानुसारी एकदा नियुक्तिप्रक्रियायाः आदौ पूर्वं निर्धारिताः 'क्रीडायाः नियमाः' मध्ये परिवर्तितुं न शक्यते। न्यायालयेन उक्तं यत् चयननियमाः संविधानस्य चतुर्दश अनुच्छेदस्य अनुरूपाः एव भवेयुः।

<u>अमितशाह सम्मेलनम् :</u>

केन्द्रीयगृहमन्त्री अमितशाहः अद्य घोषितवान् यत् आतङ्कवादस्य आतङ्कवादिनः च पारिस्थितिकीतन्त्रस्य विरुद्धं सर्वकारः शीघ्रमेव राष्ट्रिय आतङ्कवादविरोधी नीतिं रणनीतिं च आनयिष्यति। नवदिल्ल्यां एनआईए इति राष्ट्रियान्वेषणसंस्थाया आयोजितस्य द्विदिवसीय आतङ्कवादरोधीसम्मेलनस्य उद्घाटनं कुर्वन् श्रीशाहः अवदत् यत् विगतेषु दशवर्षेषु प्रधानमन्त्रिणः नरेन्द्रमोदिनः कार्यभार-ग्रहणानन्तरम् आतङ्कवादविरुद्धं सशक्तं दृष्टिकोणं सर्वकारेण स्वीकृतम्। श्रीशाहः अवदत् यत्, विगतेषु दशवर्षेषु आतङ्कवादविरुद्धं कर्याचरणाय देशे एकः सशक्तः पारिस्थितिकीतन्त्रः विकसितः अस्ति। सः अवदत् यत्, षडाधिक द्विसहस्र वर्षतः त्रयोदशोत्तर द्विसहस्रतम वर्षाणां कालखण्डस्य अपेक्षया चतुर्दशोत्तर द्विसहस्रतः एकविंशत्यधिक-द्विसहस्रतमवर्षपर्यन्तं आतङ्कवादीनां घटनासु सप्ततिः प्रतिशतं न्यूनतागता।

केन्द्रीय-गृहमन्त्री अवदत्, आतङ्कवादीनां आक्रमणानि तेषां षडयंत्रं च सीमारहितरूपेण अदृश्यरूपेण च देशस्य विरुद्धम् कार्याणि सम्पादयति। सः यूनां अधिकारिणां कृते विशेषप्रशिक्षणस्य आवश्यकतायाः उपरि बलं दत्तवान्।

ओ.आर.ओ.पी.

प्रधानमन्त्री नरेन्द्र: मोदी प्रोक्तवान् यत् वन-रैंक-वन-पेंशन-इति योजनाया: परिपालनस्य निर्णय: राष्ट्रनायकान् प्रति राष्ट्रस्य कृतज्ञतां ज्ञापायितुम् एकं महत्वपूर्णं पदं वर्तते। अद्य योजनाया: दशमसपूर्त्यवसरे एकस्मिन् सामाजिक-संचार-माध्यमे प्रधानमन्त्री प्रोक्तवान् यत् पदक्षेपोऽयं तेषां भूतर्पूव-कार्मिकाणां कृते श्रद्धाञ्जलि: अस्ति ये राष्ट्ररक्षार्थं स्वप्राणान् अपि त्यक्तुं शंकां नैव कुर्वन्ति। प्रधानमन्त्री कथितवान् यत् पदक्रमोऽयं सैन्यबलानि प्रति केन्द्रिय-प्रशासनस्य प्रतिबद्धताया: प्रतिनिधित्वं विदधाति।

छठ-पर्व

राष्ट्रपति: द्रौपदी-मुर्मु: इत्यनया सूर्य-षष्ठी छठ-इति पर्वण: अवसरे जनेभ्य: शुभकामा: प्रदत्ता:। राष्ट्रपतिना प्रोक्तं यत् इदं पर्व न केवलं प्रकृति-प्रदत्तानां पदार्थानां यथा नदी-सरोवराभ्यां कृते समादरं जनयति, अपितु उपवासमाध्यमेन आत्मानं मनश्च पुनाति। सा प्रोक्तवती यत् अयं महोत्सव: जनान् पर्यावरणस्य रक्षार्थं प्रेरयति। राष्ट्रपतिना इयं कामना प्रकटिता यत् उत्सवोऽयं जनानां जीवनेषु सौख्यम् आनेष्यति। उपराष्ट्रपितना जगदीप-धनखड़ इत्यनेनापि छठ-इत्यस्य पूजाया: अवसरे राष्ट्रवासिभ्य: वर्धापनानि प्रदत्तानि। सामाजिक-संचार-माध्यमस्य एकस्मिन् पटले उपराष्ट्रपति: प्रोक्तवान् यत् षष्ठी-मातु: आशीर्वचांसि राष्ट्रं प्रगतिसमृद्धयो: च मार्गे अग्रेसरिष्यन्ति। स: कथितवान् यत् भगवत: सूर्यस्य उपासनाया: उत्सवोऽयं शाश्वत-परम्पराणां, प्रकृत्या सह अस्माकं दृढ-सम्बन्धस्य च प्रतीकं वर्तते।

प्रधानमन्त्री-छठ

प्रधानमन्त्रिणा-नरेन्द्र-मोदिना अपि अद्य छठ-पूजाया: तृतीये दिने राष्ट्रवासिभ्य: शुभकामना: प्रदत्ता:। सामाजिक-संचार-माध्यमस्य एकास्मिन् पटले स: प्रोक्तवान् यत् छठ-सन्ध्याया: अर्घ्यम् सरलता-संयम-निश्चय-समर्पणानाञ्च प्रतीकम् अस्ति। तेन एषा शुभकामना प्रकटिता यत् महोत्सवोऽयं जनानां जीवनेषु सुखसमृद्धि-सौभाग्यानि च प्रयच्छतु।

भारतीयरेलवे-छठ :

यात्रिणां सुविधायै भारतीयरेलवे श्वः आरभ्य चतुः षष्ठ्यधिकैकशतानि विशिष्ट रेलयानानि चालयिष्यति। एते यात्रिणः उत्सवे भागं भजित्वा पुनः गन्तव्यस्थानं प्रत्यागमिष्यन्ति। भारतीयरेलवे विभागस्यानुसारं विगतषट्त्रिंशत्दिनेषु प्रायः सार्द्ध चतुःसहस्रं यावत् रेलयानेषु पञ्चषष्टि लक्षं यावत् यात्रिणां परिवहनं जातम्। रेलवे विभागेन अस्य मासस्य चतुर्थे दिनाङ्के एकस्मिन् एव दिने कोटित्रयाधिकयात्रिणां परिवहनस्य कीर्तिमत्विरचितम्।

पराली

पर्यावरण-वन-जलवायु-परिवर्तन-मन्त्रालयेन धान्यापशिष्ट-दाहे दण्डराशि: द्विगुणीकृत:। प्रशासनेन ह्य: राष्ट्रिय-राजधानिक्षेत्रे तत्समीपवर्ति-क्षेत्रेषु च वायु-गुणवत्ता-प्रबन्धन-आयेगस्य संशोधित-नवीन-नियमा: अधिसूचिता: सन्ति। नवीन-नियमानुसारेण द्वि एकड़-परिमितात् अल्प क्षेत्रस्य भूस्वामि-कृषका: धान्यापशिष्टस्य दाहप्रकरणे पञ्चसहस्ररूप्यकाणां दण्डशुल्क: दास्यन्ति यत् पूर्वं सार्धद्विसहस्ररूप्यकम् आसीत्। एतदधिकं-पञ्चएकड़-परिमितस्य क्षेत्रस्य भूस्वामिन: कृषका: पर्यावरणस्य क्षतिपूर्तये दशसहस्ररूप्यकाणि दास्यन्ति। तत्रैव पञ्चएकड़ परिमितादप्यधिक-क्षेत्रस्यस्वामिन: कृषका: त्रिंशत्-सहस्र-रूप्यकाणां क्षतिपूर्ति-शुल्क: प्रदास्यन्ति।

कोरिया बैडमिंटन :

बैडमिण्टन-क्रीडायां भारतस्य किरणजॉर्ज: इत्येष: इक्सान्-नगरे आयोक्ष्यमाणे कोरिया-मास्टर्स्-प्रतियोगितायाः प्रागुपान्त्यचक्रीयद्वन्द्वे प्रविष्टवान्।

।।इति वार्ता:।।